प्रत्यहं भोजयेद्विप्रान् न्यूनाधिक्यप्रशान्तये। अथवा सर्वसम्पूर्त्तौ होमादिकमथाचरेत्”। मुण्डमालायाम् “तस्य यावान् जपः प्रोक्तस्तद्दशांशमनुक्रमात्। तत्तद्द्रव्यैर्जपस्यान्ते होमं कुर्य्याद्दिने दिने”। पुरश्चरणचन्द्रिकायाञ्च “ततो जपदशांशेन होमं कुर्य्याद्दिने दिने। अथवा लक्षसंख्यायां पूर्णायां होममाचरेत्”। तथा होमाद्यशक्तौ सनत्कुमारीये “यद्यदङ्गं भवेद्भग्नं तत्संख्याद्विगुणो जपः। होमाभावे जपः कार्य्यो होमसंख्याचतुर्गुणः। विप्राणां, क्षत्रियाणाञ्च रससङ्ख्या गुण. स्मृतः। वैश्यानां बहुसंख्याकमेवं स्त्रीणामयं विधिः। यं वर्णमाश्रितः शूद्रः स च तस्य विधिञ्चरेत्। अनाश्रितस्य शूद्रस्य दिक्संख्याकः समीरितः। शूद्रस्य विप्रभक्तस्य तत्तुल्यः सदृशो जपः”। अत्राप्यशक्तश्चेद्‌ योगिनीहृदये “होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः। इतरेषान्तु वर्णानां त्रिगुणादिः समीरितः। त्रिगुणादिः होमसंख्यात्रिगुणजपः क्षत्रियेण कार्य्यः। वैश्येन चतुर्गुणः। शूद्रेण पञ्चगुणः कार्यः। तदुक्तं कुलप्रकाशे “यद्यदङ्गं विहीनं स्यात्तत्संख्याद्विगुणो जपः। कुर्वीत त्रिचतुःपञ्च यथासंख्यं द्विजादयः”। एतेन स्त्रीशूद्रादीनां होमाधिकारः। तथा च शूद्राणां त्वस्त्वमिति कुण्डप्रकरणे शारदायाम्। स्त्रीणां होमाधिकारश्च तत्रैव “लाजैस्त्रिमधुरोपेतैर्होमैः कन्यां प्रयच्छति। अनेन विधिना कन्या वरमाप्नोति वाञ्छितम्”। अतः स्त्रीणां होमाधिकारः। तच्च ब्राह्मणद्वारा तथा च तन्त्रे “ओङ्कारोच्चारणाद्धोमात् शालग्रामशिलार्च्चनात्। ब्राह्मणीगमनाच्चैव शूद्रश्चाण्डालतां व्रजेत्”। तथा स्त्रीणामपि सर्ववैदिककर्मसु शूद्रतुल्यत्वप्रतिपादनात् यथा “स्त्रीशूद्रकरसंस्पर्शो वज्रपातसमो मम” इति भगवद्वचनात् तथा नारायणकल्पे “अष्टाक्षरो महामन्त्रः सप्रार्णः शूद्रयोषितोः। प्रणवादिस्तु यो मन्त्रो न स्त्रीशूद्रे प्रशस्यते” इति सर्वत्र स्त्रीणां शूद्रवद्व्यवहारः। सर्वेषां वा द्विगुणो जपः। तथा च तन्त्रान्तरे “यद्यदङ्गं विहीयेत तत्संख्याद्विगुणो जपः। कर्त्तव्यस्याङ्गसिद्ध्यर्थं मदशक्तेन भक्तितः। न चेदङ्गं विहीयेत तद्विशिष्टमवाप्नुयात्” तथागस्त्यसंहितायाम् “यदि होमेऽप्यशक्तः स्यात् पूजायां तर्पणेऽपि वा। तावत्संख्यजपेनैव ब्राह्मणाराधनेन च। भवेदङ्गद्वयेनैव पुरश्चरणमाप्यते”। तत्र ब्राह्मणभोजनमावश्यकमेव “सर्वथा भोजयेद्विप्रान् कृतसाङ्गत्वसिद्धये। विप्राराधनमात्रेण व्यङ्गं साङ्गं भवेद्ध्रुवम्। दीक्षाहीनान् पशून् यस्तु भोजयेद्वा स्वमन्दिरे। स याति परमेशानि! नरकानेकविंशतिम्”। पशुर्द्विधा अदीक्षितः कुलाचारनिन्दकश्च यथा कुलार्णवे “अदीक्षितः कुलाचारनिन्दको द्विविधः पशुरिति”। नैवेद्यदानेऽपि “न पशुभ्यो न वाऽद्विजे” इति निन्दाश्रवणाच्च सर्वत्रायं विधिरिति सम्प्रदायः। “एवं यः कुरुते देवि! पुरश्चर्य्यादिकं प्रिये। सर्वपापविनिर्मुक्तो देवसायुज्यमाप्नुयात्”। ततश्च “गुरवे दक्षिणान्दद्याद्भोजनाच्छादनादिभिः। गुरुसन्तोषमात्रेण मन्त्रसिद्धिर्भवेत् ध्रुवम्। सम्यक्सिद्धैकमन्त्रस्य पश्चाङ्गोपासनेन च। सर्वे मन्त्राश्च सिद्ध्यन्ति तत्प्रसादात् सुरेश्वरि!। गुरुमूलमिदं सर्वमित्याहुस्तन्त्रवेदिनः। एकग्रामे स्थितो नित्यं गत्वा वन्देत वै गुरुम्। गुरुरेव परंब्रह्म तस्मादादौ तमर्च्चयेत्। तदन्ते महतीं पूजां कुर्य्यात् साधकसत्तमः। सुवासिनीं कुमारीञ्च भूषणैरभिभूषयेत्। मिष्टान्नं बहुशः कार्य्यं भुञ्जीत बान्धवैः सह। एवं सिद्धमनुर्मन्त्री साधयेत् सकलेप्सितान्”। तन्त्रे “अथ वान्यप्रकारेण पुरश्चरणमिष्यते। ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्व्वमुपोषितः। नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः। ग्रासाद्विमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः। इति कृत्वा न सन्देहो जपस्य फलभाग् भवेत्”। नद्यभावे “यद्वा पुण्योदके स्नात्वा शुचिः पूर्व्वमुपोषितः। ग्रहणादिविमोक्षान्तं जपेन्मन्त्रं समाहितः” उपवासासामर्थ्ये तु तत्रैव “अथ वान्यप्रकारेण पौरश्चरणिको विधिः। चन्द्रसूर्य्योपरागे च स्नात्वा प्रयतमानसः। स्पर्शाद्विमोक्षपर्य्यन्तं जपेन्मन्त्रं समाहितः। जपाद्दशांशतो होमं तथा होमात्तु तर्पणम्। एवं कृत्वा तु मन्त्रस्य जायते सिद्धिरुत्तमा। चन्द्रसूर्य्योपरागे तु ये शक्ताः परसेविनः। तेषां विद्या न सिद्ध्यन्ति परं नरकगामिनः। सूर्य्याचन्द्रमसोः पर्व्व प्राप्यापि च पुरस्क्रियाम्। ये मूढा न च कुर्वन्ति ते भवन्ति कुलद्रुहः” इति कुलार्णववचनात् पुरश्चरणस्यावश्यकत्वमेवेति। गोपालमन्त्रतर्पणं तु होमसमसंख्यकं यथा “इह गोपालमन्त्राणां तर्पणं होमसंख्यया” इति। “दृष्ट्वा स्नात्वा ससङ्कल्पो विमोक्षान्तं जपञ्चरेत्। तावद्यत्नादिकं कुर्य्याद्ग्रहणान्ते शुचिः पुमान्। एवं जपे मन्त्रसिद्धिर्भवत्येव न संशयः”। ग्रहणे